# टिळक महाराष्ट्र विद्यापीठ, पुणे

**23E**

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे – २०२५**

**सत्र ४ थे**

**विषयः पारंपरिक इतिहास आणि पुराणकथा (23E443)**

**दिनांक :२१/०५/२०२५ गुण : १०० वेळ : स. १०.०० ते दु. १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १) कान्यपि त्रीणि माध्यमभाषया अनुवदतो।** **(३०)**

१) शाखावसक्तान् खड्गांश्च प्रवराण्यम्बराणि च । पश्य विद्याधरस्त्रीणां क्रीडोद्देशान् मनोरमान्।।
जलप्रपातैरुद्भैदैर्निष्पन्दैश्च क्वचित् क्वचित् स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः।।

२) द्वादशैतानि वर्षाणि राष्ट्राद्विप्रोषिता वयम्। त्रयोदशोऽयं सम्प्राप्तः कृच्छ्रः परमदुर्वसः।।
स साधु कौन्तेय इतो वासमर्जुन रोचय। यत्रेमा वसतीः सर्वा वसेमाविदिताः परैः।।

३) तं विजित्य महाबाहुः कुन्तीपुत्रो धनञ्जयः। प्रययावुत्तरां तस्माद्दिशं धनदपालिताम्।।
अन्तर्गिरिं च कौन्तेयस्तथैव च बहिर्गिरिम्। तथोपरिगिरिं चैव विजिग्ये पुरुषर्षभः।।

४) बिल्वैः कपित्थैर्जम्बीरैवृत्तं भल्लातकादिभिः। तस्मिन्सरः सुविपुलं लसत्का ञ्चनपङ्कजम्।।
तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः। उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम्।।

५) सुशर्माणं कण्वश्च भृत्यो बलात् शिप्रकनामा हत्वा अन्ध्रजातीयो वसुधां भोक्ष्यति। ततश्च कृष्णनामा तद्भ्राता भूपतिर्भावी। तस्य श्रीकान्तकर्णिः, तस्यापि पूर्णोत्सङ्गः,तत्पुत्रश्च शातकर्णिः, तस्माच्च लम्बोदरः, तस्माद् द्विविलकः, ततो मेघस्वातिः, ततः पटुमान, ततश्च अरिष्टकर्मा, ततो हालः, हालात् पुत्तलकः, ततः प्रविल्लसेनः, ततः सुन्दरः, शातकर्णी, तस्माच्चकोरः शातकर्णी।

**प्र. २) कान्यपि पञ्च ससन्दर्भं स्पष्टीकुरुत।** **(३०)**

१) वनं सभार्यः प्रविवेश राघवः सलक्ष्मणः सूर्य इवाभ्रमण्डलम्।

२) दक्षिणं शालसङ्काशमूरुं भेजे शुभानना।

३) करमाहारयिष्यामि राज्ञः सर्वान्नृपोत्तम।

४) अनेन वनवासेन मम प्राप्तं फलद्वयम्।

५) पञ्च प्रद्योताः पृथिवीं भोक्ष्यन्ति।

६) हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ।

७) प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्।

८) एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः।

**प्र. ३) काश्चन तिस्रः टिप्पणीः लिखत।** **(३०)**

१) पाण्डवानां रूपान्तरनिश्चयः

२) अनसूयया सीतायै कृतः उपदेशः

३) गजेन्द्रमोक्षकथा

४) चित्रकूटशोभावर्णनम्

५) मन्वन्तरादिकालविभागाः

**प्र. ४) रूपपरिचयं लिखत।(कान्यपि पञ्च)** **(१०)**

१. ध्रियताम् २. लघूनि ३. भविष्यन्ति
४. कम्पयन् ५. राजन् ६. इमम्
७. महाबाहो ८. शोभयेत्।

----------